# ३३. प्रतिष्ठानपुरकल्पः ।

श्री**सुव्रतजिनं** नत्वा प्रतिष्ठां प्रापुषः[1] क्षितौ । **प्रतिष्ठानपुर**स्याभिदध्मः कल्पं यथाश्रुतम् ॥ १ ॥

[0]इह **भारते** वर्षे दक्षिणखण्डे **महाराष्ट्र**देशावतंसं श्रीमत्**प्रतिष्ठानं** नाम पत्तनं विद्यते । तच्च निजभूत्याभिभूतपुरुहूत[2]पुरमपि[0] कालान्तरेण क्षुल्लकग्रामप्रायमजनिष्ट । तत्र चैकदा द्वौ वैदेशिकद्विजौ समागत्य[3] विधवया स्वस्रा साकं कस्यचित्कुम्भकारस्य शालायां तस्थिवांसौ । कणवृत्तिं विधाय कणान् स्वसुरुपनीय तत्कृताहारपाकेन समयां कुरुतः स्म । अन्येद्युः सा तयोर्विप्रयोः स्वसा जलाहरणाय **गोदावरीं** गता । तस्याश्च रूपमप्रतिरूपं निरूप्य स्मरपरवशोऽन्तर्ह्रदवासी **शेषो** नाम नागराजो ह्रदान्निर्गत्य विहितमनुष्यवपुस्तया सह बलादपि सम्भोगकेलिमकलयत् । भवितव्यताविलसितेन तस्याः सप्तधातुरहितस्यापि तस्य दिव्यशक्त्या शुक्रपुद्गलसञ्चाराद्गर्भाधानमभवत् । स्वनामधेयं प्रकाश्य, व्यसनसङ्कटे मां स्मरेत्यभिधाय च, नागराजः पाताललोकमगमत् । सा च स्वगृहं प्रत्यगच्छत् । व्रीडापीडितया तया[4] च स्वभ्रात्रे स्ववृत्तान्तं न खलु न्यवेदयत् । कालक्रमेण सौदर्याभ्यां गर्भलिङ्गानि वीक्ष्य सा जातगर्भेत्यलक्ष्यत[5] । ज्यायसस्तु मनसि शङ्का जाता, यदियं खलु कनीयसोपभुक्तेति । शङ्कनीयान्तराभावाद्यवीयसोऽपि चेतसि समजनि विकल्पो, नूनमेषा ज्यायसा सह विनष्टशीला–इत्येवं मिथः कलुषिताशयौ विहाय तामेकाकिनीं पृथक् पृथक् देशान्तरमयासिष्टाम् । सापि प्रवर्धमानगर्भा परमन्दिरेषु कर्माणि निर्मिमाणा प्राणवृत्तिमकरोत् । क्रमेण पूर्णेऽनेहसि सर्वलक्षणलक्षिताङ्गं प्रासूत सूनुम् । स च क्रमाद् वपुषा गुणैश्च वर्धमानः सवयोभिरमा रममाणो बालक्रीडया स्वयं भूपतीभूय तेभ्यो वाहनानि करितुरगरथादीनि कृत्रिमाणि दत्तवानिति । सनोतेर्दानार्थत्वात् । लोकैः **सातवाहन** इति व्यपदेशं लम्भितः । स्वजनन्या पाल्यमानः सुखमवास्थित ।

इतश्चो**ज्जयिन्यां** श्री**विक्रमादित्य**स्या**वन्ति**नरेशितुः सदसि कश्चिन्नैमित्तिकः **सातवाहनं प्रतिष्ठानपत्तने** भाविनं नरेन्द्रमादिक्षत् । अथैतस्यामेव पुर्यामेकः स्थविरविप्रः स्वायुरवसानमवसाय चतुरः स्वतनयानाहूय प्रोक्तवान् । यथा–वत्स ! मयि [6]परेयुषि मदीयशय्योच्छीर्षकदक्षिणपदादारभ्य चतुर्णामपि पादानामधो वर्तमानं निधिकलशचतुष्टयं युष्माभिर्यथाज्येष्ठं विभज्य ग्राह्यम्, येन भवतां निर्वाहः संपनीपद्यते । पुत्रैस्तु तथेत्यादेशः स्वीचक्रे पितुः । तस्मिन्नुपरते तस्यौर्ध्वदेहिकं कृत्वा त्रयोदशेऽहनि भुवं खात्वा यथायथं चतुरोऽपि निधिकलशांस्ते जगृहिरे । यावदुद्घाट्य निभालयन्ति तावत्प्रथमस्य कुम्भे कनकम्, द्वैतीयकस्य कृष्णमृत्स्ना, तृतीयस्य बुशम्, तुरीयस्य चास्थीनि ददृशिरे । तदनु ज्यायसा साकं इतरे त्रयोऽपि विवदन्ते स्म–यदस्मभ्यमपि विभज्य कनकं वितरेति । तस्मिंश्चावितरति सति ते**ऽवन्तिपते**र्धर्माधिकरणमुपास्थिषत । तत्रापि न तेषां वादनिर्णयः समपादि । ततश्चत्वारोऽपि ते **महाराष्ट्र**जनपद[7]मुपानंसिषुः । **सातवाहन**कुमारस्तु कुलालमृदा हस्त्यश्वरथसुभटानन्वहं नवनवान् विदधानः कुलालशालायां बालक्रीडादुर्ललितः कलितस्थितिरनयत् समयम् । ते च द्विजतनुजाः प्रतिष्ठानपत्तनमुपेत्य परितस्तस्यामेव चक्रजीवनशालायां तस्थिवांसः । **सातवाहन**कुमारस्तु तानवेक्ष्येङ्गिताकारकुशलः प्रोवाच–भो विप्राः ! किं भवन्तो [8]वीक्षापन्ना इव वीक्ष्यन्ते । तैस्तु जगदे–जगदेकसुभग ! कथमिव वयं चिन्ताचान्तचेतसस्त्वयाऽज्ञासिष्महि । कुमारेण बभणे–इङ्गितैः किमिव नावगम्यते ! । तैरुक्तम्–युक्तमेतत्; परं भवतः पुरो निवेदितेन चिन्ताहेतुना [9]किं स्याद् ? । बालः खलु भवान् । बाल आलपद्–यदि परं जातु मत्तोऽपि साध्यं वः सिध्यति । तन्निवेद्यतां स चिन्ताहेतुः । ततस्ते तद्वचनवैचित्रीहृतहृदयाः सकलमपि स्वस्वरूपं निधिनिरयणादि **मालवे**शपरिषद्यपि विवादानिर्णयान्तं तस्मै निवेदितवन्तः । कुमारस्तु स्मितविच्छुरिताधरोऽवादीत्–भो विप्राः ! अहं यौष्माकं झगटकं निर्णयामि, श्रूयतामवहितैः । यस्य तावद्वृप्त्रा कनककलशं प्रददे स तेनैव निर्वृतोऽस्तु । यस्य कलशे कृष्णमृत्स्ना निरगात्स क्षेत्रकेदारादीन् गृह्णातु । यस्य तु बुशं स

---

1 B प्रापुकः । 0 एतदन्तर्गता पंक्तिः पतिता C आदर्शे । 2 B नास्त्येतत्पदम् । 3 B समागम्य । 4 C पीडिततया । 5 B लक्ष्यते । 6 B Pa पुरेयुषि । 7 Pa °पदे । 8 B Pa वीक्ष्यापन्ना । 9 B विना हेतुना ।

कोष्ठागारगतधान्यानि सर्वाण्यपि स्वीकुरुताम् । यस्य चास्थीनि निरगुः सोऽश्वगोमहिषीवृषभदासीदासादिकमुपादत्तामिति युष्मज्जनकस्याशयः । इति क्षीरकण्ठोक्तं श्रुत्वा सूत्रकण्ठाश्छिन्नविवादास्तद्वचनं प्रतिश्रुत्य तमनुज्ञाप्य प्रत्याययुः स्वनगरीम् । प्रथिता सा तद्विवादनिर्णयकथा पुर्याम् । राज्ञाप्याकार्य पर्यनुयुक्ताः–किं नु भो ! भवतां वादनिर्णयो जातः ? । तैरुक्तम्– आम स्वामिन् ! । केन निर्णीतः ?–इति नृपेणोदिते **सातवाहन**स्वरूपं सर्वमवितथमचकथन् । तदाकर्ण्य, तस्य शिशोरपि बुद्धिवैभवं विभाव्य, प्रागुक्तं दैवज्ञेन तस्य **प्रतिष्ठाने** राज्यं भविष्यदनुस्मृत्य, तं स्वप्रतिपन्थिनमाकलय्य क्षुभितमनास्तन्मारणौपयिकमचिन्तयच्चिरं नरेश्वरः । अभिमरादिप्रयोगैर्मारिते चास्मिन्नयशः-क्षात्रवृत्तिक्षती भवेतामिति विचार्य सन्नद्धचतुरङ्गचमूसमूहोऽवन्तिपतिः प्रस्थाय **प्रतिष्ठानपत्तनं** यथेष्टमवेष्टयत् । तदवलोक्य ते ग्राम्यास्त्रस्ताश्चिन्तयन्ति स्म । कस्योपर्ययमेतावानाटोपः सकोपस्य **मालवेशस्य** ? । न तावदत्र राजा राजन्यो वा वीरस्तादृग्दुर्गादि वेति चिन्तयत्सु तेषु **मालवेश**प्रहितो दूतः समेत्य **सातवाहन**मवोचत्–भो कुमारक ! तुभ्यं नृपः क्रुद्धः प्रातस्त्वां मारयिष्यत्यतो युद्धाद्युपायचिन्तनावहितेन भवता भाव्यमिति । स च श्रुत्वापि दूतोक्तीर्निर्भयं निर्भरं[1] क्रीडन्नेवास्ते । अत्रान्तरे विदितपरमार्थौ तौ तन्मातुलावितरेतरं प्रति विगतदुर्विकल्पौ पुनः **प्रतिष्ठान**मागतौ परचक्रं दृष्ट्वा भगिनीं प्रोचतुः–हे स्वसर्येन दिवौकसा तवायं तनयो दत्तस्तमेव स्मर, यथा स एवास्य साहायकं विधत्ते । सापि तद्वचसा प्राचीनं नागपतेर्वचः स्मृत्वा शिरसि निवेशितघटा गोदावर्यां नागह्रदं गत्वा, स्नात्वा च, तमेव नागनायकमाराधयत् । तत्क्षणान्नागराजः प्रत्यक्षीभूय वाचमुवाच ब्राह्मणीं–को हेतुरहमनुस्मृतस्त्वया ? । तया च प्रणम्य यथास्थितमभिहिते, बभाषे शेषराजः–मयि प्रतपति कस्तव तनयमभिभवितुं क्षमः ? इत्युदीर्य तद् घटमादाय ह्रदान्तर्निमज्य पीयूषकुण्डात् सुधया घटं प्रपूर्यानीय च तस्यै दत्तवान् । गदितवांश्च–अनेनामृतेन **सातवाहन**कृतमृन्मयाश्वरथगजपदातिजातमभिषिञ्चेः, यथा तत्सजीवं भूत्वा परबलं भनक्ति । त्वत्पुत्रं च **प्रतिष्ठान**पत्तनराज्ये अयमेव पीयूषघटोऽभिषेक्ष्यति । प्रस्तावे पुनः स्मरणीयोऽहम्–इत्युक्त्वा स्वास्पदमगमद्भुजङ्गपुङ्गवः । सापि सुधाघटमादाय स्वसद्मोपेत्य, तेन तन्मृन्मयं[2] सैन्यमदैन्यमभ्युक्षामास । प्रातर्दिव्यानुभावतस्सचेतनीभूय तत्सैन्यं सम्मुखं गत्वा युयुधे परानीकिन्या सार्द्धम् । तया **सातवाहन**पृतनया भग्नमवन्तीशितुर्बलम् । **विक्रमनृपति**रपि पलाय्य ययाववन्तीम् । तदनु **सातवाहनो** राज्येऽभिषिक्तः । **प्रतिष्ठानं** च पुनर्निजविभूतिपरिभूतवस्वोकसाराभिमानं धवलगृहदेवगृहहट्टपंक्तिराजपथप्राकारपरिखादिभिः सुनिविष्टमजनिष्ट पत्तनम् । **सातवाहनो**ऽपि क्रमेण **दक्षिणापथ**मनृणं विधाय **तापी**तीरपर्यन्तं चो**त्तरापथं** साधयित्वा स्वकीयसंवत्सरं प्रावीवृतत् । जैनश्च समजनि । अचीकरच्च जनितजननयनशैत्यानि जिनचैत्यानि । पञ्चाशद्वीरा अपि प्रत्येकं स्वस्वनामाङ्कितान्यन्तर्नगरं कारयांबभूवुर्जिनभवनानि ।

**॥ इति प्रतिष्ठानपत्तनकल्पः ॥**

॥ ग्रं० ४७ ॥

---

1 B नास्ति पदमेतत् । 2 Pa मृन्मय° ।